# अष्ठम् प्रकरणम्
# उपसंहार:

"साहित्यं समाजस्य दर्पण:" इत्युक्ति: सार्थक्यं प्रतिपादयति । साहित्येन विना तत्कालीनसमाजस्य साङ्गोपाङ्ग चित्रं न प्राप्यते । तर्हि समाजस्य दर्शनाय साहित्यं तु परमं साधनं न तत्र शङ्क जायते । वैदिकवाङ्मयं साधनीकृत्य तत्कालिसमाजव्यवस्थाया: शोधकर्तार: बभूवु: तथापि वियमहोदधौ अस्मिन् बहव: रत्नान्वेष्का: पतन्त: सन्ति ।

संसारोऽयं परिवर्तनशील: । अत्र व्यवस्थापि समयानुसारं स्वं परिवर्तयति । परंतु का व्यवस्था आदर्शभूता भवेत् ? कदा समाज: सामाजिकीम् आध्यात्मिकीं च उन्नतिम् अलभत् । कदा समाजे सद्भावना सहजतया स्वीकृत वन्त: ? एतेषां प्रश्नानाम् उत्तरन् वेदकालीनसमाजव्यवस्था इति विदुषाम्मतम् । मतमिदं शोधमहानिबन्धे यज्ञाज्ञानं समीक्षां विधाय, प्राप्तगेन्थानामनुशीलनं कृत्वा मदीयेऽस्मिन् अष्ट विभागात्मके शोधप्रबन्धे निरूपितम् । वस्तुतस्तु सकलमपि संशोधितं तथ्य महाप्रबन्धे प्रतिपादितम् । किन्तु शोधमहानिबन्धस्य उपसंहारेण मदीयं प्रारब्धदिं शोधकायं समाप्नोति । यत्किमपि निरूपणीयमभवत् समाप्नोति । यत्किमपि निरूपणीयमभवत तदग्रे एवोक्तम् । तथापिसमापनमनिवार्यं तच्चं निष्कर्षाभिव्यक्त्या विधीयते । अतो हि मदीयस्यास्यान्तिमोपसंारविषयके प्रकरणे विलिख्यते ।

प्रकरणमिदं नातिविशेषं सविशेषञ्येति द्विविधं स्थानं भजते । कथमत्र सकलानामपि सप्तानां प्रकरणानां शोधमहानिबन्धस्य निष्कृष्ट–निष्कर्ष: सविशेषतया शोधदृष्ट्या चिन्तनं विधाय प्रतिपाद्यते । अतोऽहमनुमनोमि मम–शोधमहानिबन्धस्य प्रकरणमिदं वैशिष्ट्यं विस्तारयति । "वैदेषु निरूपिता

समाजव्यवस्था समाज कल्याणदर्शनञ्च" शोधविषयस्यशीर्षकमिदं स्वीकृत्य चिन्तितं मया यत् सर्वप्रथमं वैदिकवाङ्मयस्य समस्तपरिचयः शोधकार्यात् प्रागे भवेत् । पृथक् विचार्य संशोध्य च प्रथमं प्रकरणं निरूपितम् ।

तत्र च वेदानां परिचयः, वेदशब्दार्थनिर्वचनं, वेदशब्दस्य पारिभाषिकार्यः, वेदशब्दस्य व्युत्पतिविचारः, वेदशब्दस्य पर्यायवाचिनः, वेदानां महत्वं, प्रादुर्भावपृथक्करणविषये मतम्, ऋग्वेदस्य महत्वमक्त,यजुर्वेदस्य विशेषता महत्वञ्च, सामपरिचयः वैशिष्ट्यञ्च तथान्ते पञ्चाद्वर्ती वेदोत्तरवैदिकसाहित्यपरिचयः इत्यादि संशोधनस्य पूर्ववर्तिनः प्रमुखविषयांशान भूरिशः विचिन्त्य निरूपितवानहम् ।

पश्चाद्वर्तिनि द्वितियस्मिन्प्रकरणे, वैदिकवाङ्मये विषयवैविध्यं वैशिष्ट्ञ्चे व्याख्ये निरूपितं यत् यस्याःकस्यापि भाषायाः साहित्यं न केवलमेकं पक्षं परन्त सर्वान् विषयान् सहजतयाप्रस्तौति । तद्वत् वैदिकसाहित्यमपि वेदकालीनसभ्यतायाः संस्कृतेश्च प्रतिपादनं कुर्वन् तत्कालीनं प्राकृतिकं, भौगोलिकं, विज्ञानवियकम्, आयुर्वेदिकं तथा प्राणिविज्ञानम् इत्यादीनामपि ज्ञानं ददाति । प्रकरेणऽस्मिन् मया उपर्युक्तान् विषयान् निरूप्य तद्वर्णन किं वैशिष्ट्यमिति लिखितवती ।

तदुत्तरवतिनि तृतीये प्रकरणे वैदिकवाङ्मये प्रमुखसुक्तेषु समाजव्यवस्थायाः दार्शनिक विचाराः समीक्ष्य निरूपिताः सन्ति । यथा

सहस्रशीर्षा पुरूषः सहस्राक्षः सहस्रपात् ।[१]
स भूमि विश्वतो वृत्वात्यतिष्ठत् दशाङ्गलम् ॥

१. ऋग्वेदसंहिता-१/९०/१

इत्थमत्र निरूप्यते जगतः उत्पत्तेः प्रारभ्य सकलजनानां सर्वप्राणिनाञ्च समृद्धिपरिपूर्णजीवनं केन प्रकारेण भवेदिति विचारपूर्णाः दार्शनिकविचारधाराः वर्णतास्त्यत्र । जगतः उत्पत्तिः विराट्पुरूषात् भवतिसः विराट् पुरूषः कीदृशः विद्यते, तत्सूचितं मन्त्रे ।

विशेषन्तु संक्षेपेण कथयितुं शक्यतेयत् वैदिकवाङ्मये सर्वत्र समाजव्यवस्थायाः दार्शिनिकविचाराः सन्ति । किन्तु प्रमुखसूक्ताना सारभूतविचारान् संशोध्य निरूपिताः सन्ति । यतो हि विचाराइमे समाजस्य कृते उपकारकाः स्युः ।

तत्पश्चाद्वर्तिप्रकरणे चतुर्थे, मन्त्रदृष्टारः ऋषयः समष्टिसमाराधनेनैव ऋषित्वं प्राप्यते । समष्टिसमुपासकाः ऋषयः अतः वैदिकवाङ्मये लोककल्याणस्य सङ्कल्पनानां प्राचुर्यम्प्राप्यते ।"धियो यो नः प्रचोदयात्"

मा भ्राता भ्रातरं द्विक्षन् मास्वरारमुत स्वसा ।
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया ॥

सहनाववतु सह नौ भुनक्तु सहवीर्यं करवावहै ।
तेजस्विनावधीतमस्त, मा विद्विषावहै ॥

एतादृशैर्मन्त्रैः वैदिकमन्त्रः जगति लोककल्याणस्य संकल्पनां दत्तवन्तः । अथच ताम उपासकाः अस्यां संकल्पनां स्वजीवने गृहीत्वा सम्पूर्णसमाजे विश्वकल्याणस्य सन्देशं प्रदत्तवती ।

'वैदिकवाङमये निरूपिता सामाजिकसंरचना' इत्याख्ये पञ्चमप्रकरणे समस्ताऽपि समाजरचनां विचिन्त्य संशोध्य च निरूपिता । यथा कस्याऽपि

राष्ट्रस्य संस्कृतेः वा उन्नतिः प्रगतिश्च तस्य समाजव्यवस्थायाः आधारेण भवति ।

इत्थमत्र वैदिकवाङमये सामाजिक संरचना कीदृशी आसीदिति, समाजव्यवस्था, आश्रमव्यवस्था, विवाहद्वारा, पारिवारिकव्यवस्था, नारीस्थानमित्यादिभिः विचारैः सम्यक्तया समीक्ष्य । निष्कर्षभूतं तथ्यमत्र सविशदं वर्णितम् । संक्षेपतोऽत्र सकलमपि वैदकसाहित्यगतं समाजव्यवस्थायाः चिन्तनमिह संशोध्य निरूपितम् ।

अनन्तरं षष्ठे विभागे आधुनिकसमाजव्यवस्थायाः विचाराः प्रतिपादिताः वर्तन्ते । विश्वस्मिन् सर्वविधां शान्तिः कथं स्थापिता भवेदिति आधुनिकविचाराः वेदमवल्य कथिताः विश्वशान्तिः, व्यसननिवृत्तिः, अतिथिसत्कारः, मूल्यवादिसमाजव्यवस्था, साम्यवादिसमाजव्यवस्था, ज्ञानविज्ञानादि भिः आधुनिकनिर्देशः इत्यादिप्रमुखविचारैः आधुनिकसमाज व्यवस्थायाः विचारान् लिखितवती ।

तथा च अन्तिमे सप्तमप्रकरणे वैदिकवाङमयद्वारा विश्वकल्याणं कथं स्यादिति प्रश्ने । मयाऽस्मिन् पर्यावरण विषयकचिन्तनं, धर्मनिरपेक्षतावर्णनं, विज्ञानविषयकचिन्तनं, गृहस्थजीवनं, राजधर्मस्य विचारर्वनं, उत्तमप्रबन्धनिरूपणं, श्रेष्ठमानवस्य मानवजीवनस्य च निर्माणंमित्यादः नैके आधुनिकसन्दर्भोपयोगिनः विषयः समीक्ष्य संशोध्य निरूपिताः सन्ति ।